# Swami Vivekananda Stotram

# વિવેકાનન્દસ્તોત્રમ્

## Document Information

Text title : Vivekanandastotram 1

File name : vivekAnandastotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Swami Gunatitananda

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : March 5, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# વિવેકાનન્દસ્તોત્રમ્

યતિસઙ્ઘપ્રતિષ્ઠાતા તચ્છિરોમણિસત્તમઃ ।
રામકૃષ્ણમહાશિષ્યો નેતા ભુવિ નરોત્તમઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૧॥

દિગન્તવ્યાપ્તસત્કીર્તી રાષ્ટ્રોદ્ધારકમણ્ડનઃ ।
મહારાજગુરુર્દણ્ડી ભારતોત્કર્ષસાધનઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૨॥

જ્ઞાનનેત્રસ્ફુરત્કાયો નાટ્યગાનસુપારગઃ ।
વ્યાખ્યાનપટુપૂર્ણજ્ઞઃ સન્ન્યાસી શ્રેષ્ઠચિદ્ઘનઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૩॥

તારુણ્યોજ્જ્વલરમ્યાઙ્ગો વેદસિદ્ધાન્તદર્શનઃ ।
વિશ્વવ્યાપકહૃત્પ્રેમા વિશાલજ્ઞાનલોચનઃ ।
ત્વત્તો ન હિ પરઃ કોઽપિ વિવેકાનન્દ તે નમઃ ॥ ૪॥

ભવરોગમહાવૈદ્યો વેદાન્તાભયદાયકઃ ।
મનોમલમહાશુદ્ધઃ કમલાક્ષમહાશયઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૫॥

કલિદોષમહાવહ્નિઃ સાક્ષાચ્છિવવિલોચનઃ ।
દિવ્યચારિત્ર્યપૂર્ણશ્ચ વિવેકાન્ધજનાઞ્જનઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૬॥

રાજરાજશિરોરત્નનિઘૃષ્ટચરણોત્પલઃ ।
મહામતિર્મહાભાગો ભૂગર્ભવ્યોમપારગઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૭॥

નિર્વિકલ્પસમાધિસ્થો વિચારણવિશારદઃ ।
ચિન્માત્રદિવ્યપૂર્ણાઙ્ગશ્ચરમોન્નતિદાયકઃ ।

ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૮॥

ભારતોદ્ધારસન્ત્યક્તસર્વસૌખ્યાતિમાનવઃ ।
ધર્મગ્લાનિમહારાત્રિપ્રભાતૈકસુભાવનઃ ।
ત્વમેવ હિ મહાસ્વામિન્વિવેકાનન્દ તે નમઃ ॥ ૯॥

સદ્યોજાતાય તે સ્વામિન્ વિશ્વૈકકમલાવલે ।
નમસ્તુભ્યં નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૧૦॥

મહાવીર્યધરો રાજા ભૂપાનાં યમિનાં તથા ।
પરાક્રમપ્રભાવેણ જિતેન્દ્રિયો મહાબલઃ ।
ત્વમેવ હિ નમસ્તુભ્યં વિવેકાનન્દ તે નમઃ ॥ ૧૧॥

મુનીનાં યોગિનાં ચૈવ પરાક્રાતમહદ્યશઃ ।
શબ્દે પરે ચ નિષ્ણાતઃ પારમાર્થિકદેશિકઃ ।
ત્વત્તો ન હિ પરઃ કોઽપિ વિવેકાનન્દ તે નમઃ ॥ ૧૨॥

ધર્મગ્લાન્યાપ્લુતા ભૂમિઃ સગૌરવકૃતા હિયા ।
ત્વયૈવ રામકૃષ્ણાબ્જમધુપાનધુરન્ધરઃ ।
ત્વત્તો ન હિ પરઃ કોઽપિ વિવેકાનન્દ તે નમઃ ॥ ૧૩॥

યતિસઙ્ઘમહોદ્યાનસુખસઞ્ચારકારિણે ।
નરેન્દ્રનાથદત્તાય વિવેકાનન્દસ્વામિને ।
ત્વત્તો ન હિ પરઃ કોઽપિ વિવેકાનન્દ તે નમઃ ॥ ૧૪॥

નમસ્તે પૂર્ણપ્રજ્ઞાય દિવ્યત્યાગમહાત્મને ।
નરેન્દ્રનાથદત્તાય વિવેકાનન્દસ્વામિને ॥ ૧૫॥

ઇતિ સ્વામિગુણાતીતાનન્દવિરચિતં વિવેકાનન્દસ્તોત્રમ્ ।

ઉદ્બોધનપત્રિકાતઃ વિવેકાનન્દશતવાર્ષિકીસઙ્ખ્યાયાઃ સઙ્ગૃહીતમ્ ।

Composed by Sw. Gunatitananda, who headed the San Francisco branch of Ramakrishna Math/Mission 1902-1915. He was one of the 16 direct disciples of Sri Ramakrishna. He built the first Hindu temple in North America.

Encoded and proofread by Sunder Hattangadi

*Swami Vivekananda Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*